यः सपक्षे विपक्षे च स तु साधारणो मतः ।
यस्तूभयस्माद्व्यावृत्तः स त्वसाधारणो मतः ॥
तथैवानुपसंहारी केवलान्वयिपक्षकः ।
यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः ॥
आश्रयासिद्धिराद्या स्यात् स्वरूपासिद्धिरप्यथ ।
व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा ॥
पक्षासिद्धिर्यत्र पक्षो भवेन्मणिमयो गिरिः ।
ह्रदो द्रव्यं धूमवत्त्वादत्रासिद्धिरथापरा ॥
व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत् ।
विरुद्धयोः परामर्शे हेत्वोः सत्प्रतिपक्षता ॥
साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः ।
उत्पत्तिकालीनघटे गन्धादिर्यत्र साध्यते ॥"
इति भाषापरिच्छेदः ॥ * ॥

तस्य सामान्यलक्षणानि यथा । अनुमितिकारणीभूताभावप्रतियोगि यथार्थज्ञानविषयत्वम् । यद्विषयत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वम् । ज्ञायमानं सत् यदनुमितिप्रतिबन्धकं तत्त्वं वा हेत्वाभासत्वम् ॥ * ॥ तस्य विशेषलक्षणानि यथा । उभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वं तत्त्वम् । विरुद्धान्यपक्षवृत्तित्वे सति अनुमितिविरोधिसम्बन्धाव्यावृत्तित्वं अनैकान्तिकः । विपक्षवृत्तित्वं साधारणत्वम् । सर्व्वसपक्षव्यावृत्तो हेतुरसाधारणः । व्याप्तिग्रहानुकूलैकधर्म्युपसंहाराभावो यत्र स हेत्वभिमतोऽनुपसंहार्य्यः ॥ * ॥ साध्यव्यापकाभावप्रतियोगित्वं विरुद्धत्वम् ॥ * ॥ साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थित्या प्रतिरुद्धकार्य्यलिङ्गत्वं तत्वं सत्प्रतिपक्षितत्वम् ॥*॥ व्याप्तिपक्षधर्म्मतानिश्चयविरोधिरूपवत्त्वं असिद्धिः । पक्षनिष्ठ-प्रमाविषयत्व-प्रकाराभाव-प्रतियोगिसाध्यकत्वं वाधः । इति चिन्तामणिः ॥

हेम, [न्] क्ली, (हिनोति वर्द्धते स्फुटति वेति । हि + मनिन् ।) स्वर्णम् । यथा, रघौ ।१।१०।
"हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ॥")
धुस्तूरम् । इत्यमरः । १ । ८ । ८४ ; ३।५।२३॥ केशरम् । इति राजनिर्घण्टः ॥ हिमः । इति हेमन्तशब्दटीकायां भरतधृतमाधवी ॥

हेमं, क्ली, (हि + मन् ।) सुवर्णम् । इति केचित् ॥

हेमः, पुं, (हि + मन् ।) माषकपरिमाणम् । इति वैद्यकपरिभाषा ॥ कृष्णवर्णाश्वः । बुधः । इति केचित् ॥ (ययातिवंशजरुषद्रथपुत्रः । यथा, विष्णुपुराणे । ४ । १८ । १ । "तितिक्षो रुषद्रथः पुत्त्रोऽभूत ततो हेमः हेमात् सुतपाः ॥")

हेमकन्दलः, पुं, (हेमवर्णं कन्दलं नवाङ्कुरोऽस्य । यद्वा, हेमवर्णं कन्दं लातीति । ला + कः ।) प्रवालः । इति हेमचन्द्रः ॥

हेमकान्तिः, स्त्री, (हेमवत् कान्तिरस्याः ।) दारुहरिद्रा । इति राजनिर्घण्टः ॥ स्वर्णद्युतिमति, त्रि ॥ (यथा, वृहत्संहितायाम् । ७ । २० ।
"हेमकान्तिरथवा शुकवर्णः
सस्यकेन मणिना सदृशो वा ।
स्निग्धमूर्त्तिरलघुश्च हिताय
व्यत्ययेन शुभकृच्छशिपुत्त्रः ॥")

हेमकारः, पुं, (हेम हेममयं भूषणं करोतीति । कृ + अण् ।) हेमकर्त्ता । स्वर्णकारः । यथा,
"सर्व्वसङ्करपापिष्ठं हेमकारं नराधिपः ।
अन्याये वर्त्तमानञ्च छेदयेत्स्वरसा क्षुरैः ॥"
इति मत्स्यपुराणे । २२७ । १८५ ॥

हेमकिञ्जल्कं, क्ली, (हेमवर्णं किञ्जल्कमस्य ।) नागकेशरम् । इति राजनिर्घण्टः ॥ (नागकेशरशब्देऽस्य विषयो ज्ञातव्यः ॥)

हेमकूटः, पुं, (हेममयः कूटो यस्य ।) पर्व्वतविशेषः । इत्यमरः । २।३।३॥ स तु किंपुरुषवर्षस्य सीमापर्व्वतः । नवतिसहस्रयोजनदीर्घः । द्विसहस्रयोजनप्रस्थः । द्विसहस्रयोजनविस्तारः । हिमालयादुत्तरे स्थितः । इति श्रीभागवतमतम् ॥ (यथा, महाभारते । ३ । ११० । २ ।
"पर्व्वतं स समासाद्य हेमकूटमनामयम् ।
अचिन्त्यानद्भुतान् भावान् ददर्श सुबहून्
नृपः ॥")

हेमकेतकी, स्त्री, (हेमवर्णा केतकी ।) स्वर्णकेतकी । इति राजनिर्घण्टः ॥

हेमकेलिः, पुं, (हेमवर्णः केलिः कम्पनादिः यस्य ।) अग्निः । इति शब्दमाला ॥

हेमकेशः, पुं, (हेमवर्णः केशोऽस्य । जटाया पीतत्वात् तथात्वम् ।) शिवः । इति केचित् ॥

हेमक्षीरी, स्त्री, (हेमेव पीतवर्णं क्षीरं निर्य्यासो यस्याः । ङीष् ।) स्वर्णक्षीरी । इति राजनिर्घण्टः ॥ पर्य्यायोऽस्या यथा,—
"हेमक्षीरी स्मृता पीता गौरी च काल-
दुग्धिका ।"
इति गारुडे २०८ अध्यायः ॥
"कटुपर्णी हैमवती हेमक्षीरी हिमावती ।
हेमाह्वा पीतदुग्धा च तन्मूलञ्चोकमुच्यते ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

हेमगन्धिनी, स्त्री, (हेम्नः नागकेशरस्येव गन्धोऽस्ति अस्याः । इनिः ।) रेणुकाख्यगन्धद्रव्यम् । इति रत्नमाला ॥

हेमगौरः, पुं, (हेमवत् गौरः ।) किङ्किरातवृक्षः । इति राजनिर्घण्टः ॥ (यथास्य पर्य्यायः ।
"किङ्किराती हेमगौरः पीतकः पीतभद्रकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
स्वर्णवद्गौरवर्णयुक्ते, त्रि ॥

हेमगौराङ्गः, त्रि, (हेमानीव गौराणि अङ्गान्यस्य ।) स्वर्णतुल्यगौरवर्णाङ्गविशिष्टः । यथा,
"विषेणोत्तिष्ठमानेन कालानलसमत्विषा ।
निर्दग्धहेमगौराङ्गः क्षणः कृष्णो जनार्द्दनः ॥
तं दृष्ट्वा हेमगौराङ्गं कृतं कृष्णं जनार्द्दनम् ।
ततः सर्व्वे वयं भीतास्त्वामेव शरणं गताः ॥"
इति स्कान्दे नीलकण्ठस्तोत्रम् ॥

हेमचन्द्रः, पुं, अभिधानचिन्तामणिनामकोषकर्त्ता । यथा,—
"सानेकार्थनाममालात्मकः कोषवरः शुभः ।
हेमचन्द्रप्रणीताभिधानचिन्तामणिर्मणिः ॥"
इति तस्य सूचीकारश्लोकः ॥
स्वर्णमयशशी च । सोणार चांद इति भाषा ॥

हेमज्वालः, पुं, (हेमवर्णा ज्वालास्य ।) अग्निः । इति शब्दमाला ॥

हेमतारं, क्ली, (हेम तारयति उत्कर्षं नयति । तॄ + णिच् + अच् ।) तुत्थम् । इति हेमचन्द्रः ॥ (तुत्थशब्देऽस्य विवृतिर्ज्ञातव्या ॥)

हेमदुग्धः, पुं, (हेमवर्णं दुग्धं निर्य्यासोऽस्य ।) उडुम्बरवृक्षः । इति शब्दरत्नावली ॥

हेमदुग्धकः, पुं, (हेमवर्णं दुग्धं निर्य्यासोऽस्य । कप् ।) उडुम्बरवृक्षः । इत्यमरः । १ । ४ । १२॥ (पर्य्यायो यथा,—
"उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पीतवर्णक्षीरयुक्ते, त्रि ॥

हेमदुग्धा, स्त्री, (हेमवर्णं दुग्धं निर्य्यासोऽस्याः ।) स्वर्णक्षीरी । इति जटाधरः ॥ (गुणादयोऽस्या स्वर्णक्षीरीशब्दे बोद्धव्याः ॥)

हेमदुग्धी, [न्] पुं, (हेमवर्णं दुग्धं निर्य्यासोऽस्यास्तीति । इनिः ।) यज्ञोडुम्बरवृक्षः । इति शब्दरत्नावली ॥

हेमदुग्धी, स्त्री, (हेमवर्णं दुग्धं निर्य्यासोऽस्याः । ङीष् ।) स्वर्णक्षीरी । इति राजनिर्घण्टः ॥

हेमन्तः, पुं, क्ली, (हन्ति लोकान् शैत्येनेति । हन् + "हन्ते र्मुट् हि च ।" उणा० ३ । १२९ । इति झच् हन्तेर्हि चेति हिरादेशः मुडागमो गुणश्च ।) ऋतुविशेषः । स तु अग्रहायणपौषमासात्मकः । यथा । षड़मी ऋतवः पुंसि मार्गादीनां युगैः क्रमादिति वक्ष्यमाणेनान्वयः । ते के इत्याह हेमन्त इत्यादि मार्गपौषाभ्यां ऋतुर्हेमन्तः । हन्ति सन्तापमिति । हिमोऽन्तोऽस्येति वा मनीषादित्वात् हेमन्तः । अर्द्धर्च्चादिरयमिति केचित् । तेन अस्त्रियामित्यस्यानेनापि सम्बन्धः । हेमन्शब्दोऽप्यस्तीति माधवी । इति भरतः ॥ तत्पर्य्यायः । हैमनः २ । इति शब्दरत्नावली ॥ ऊष्मागमः ३ शरदन्तः ४ हिमागमः ५ । तत्कालोद्भवजलगुणाः ।
"हैमन्तिकं जलं स्निग्धं हृद्यं बल्यं हितं गुरु ।"
इति राजनिर्घण्टः ॥*॥
तत्र लोकप्रतपनार्थमग्निप्रदानफलं यथा,—
"हेमन्ते शिशिरे चैव पुण्याग्निं यः प्रयच्छति ।
सर्व्वलोकप्रतापार्थं स पुण्यां गतिमाप्नुयात् ॥"
इति वह्निपुराणे कन्यादाननामाध्यायः ॥
तत्र भगवत्समीपे अग्निप्रज्वालनविधिः सेवाशब्दे द्रष्टव्यः ॥*॥ तत्र वर्णनीयानि ।
"हेमन्ते दिनलघुता शीतयवस्तम्बमरुवक-
हिमानि ।"
इति कविकल्पलता ॥

हेमन्तनाथः, पुं, (हेमन्ते नाथ्यते याच्यते इति । नाथ + कर्म्मणि घञ् ।) कपित्थः । इति शब्दचन्द्रिका ॥ (कपित्थशब्देऽस्य विषयो ज्ञातव्यः ॥)